स्थपाष्टकैरेकाशीत्या विनिघ्नतः पूरितो भवनस्य बन्धः दीर्घप्रस्तारमिलितहस्ताः स्वन्टचं तत्संख्यानं युग्मशरैकनिघ्नं द्विपक्षाशदुत्तरशतपूरितम् एकीकृतं पूर्व्वाङ्केन मिलितं रसनिशाकरयुग्मभुक्तशेषं षोड़शाधिकद्विशतहृताषशिष्टं तत्संख्यानं पिण्डपदसंज्ञं गृहस्य भवति तद्गृहभूमिसमाहृतपिण्डपदं वसुलोचनरन्ध्रगजैः। अष्टद्विनवाष्टभिर्यथाक्रमं गुणितं पूरितं यथाक्रमं रविभूधरत्रिंशद्‌योगहृतं द्वादशसप्तत्रिंशत्सप्तविंशतिभिर्हृतं गृहस्य यथाक्रममायव्ययस्थितिनक्षत्रपदं भवतीत्यर्थः।

“गृहहस्तमिति बन्धे भरण्या योगतो यथा।
आयादयो भवन्त्यत्र वसुषट्तिथियुञ्जिताः॥
अत्र नक्षत्रं दीयते पश्चात्तदेवायाति।
प्रत्यक्‌दक्षिणयोर्भं त्रविशाद्यं विदिक्षु दहनादि।
पूर्व्वोत्तरयोर्गृहयोरश्विन्यादिभानि स्युः।
यत्र तु शेषो नास्ति तत्र हारकाङ्कः शेषः॥
शेषाङ्केन फले बोध्ये शेषाभावे तु हारकात्।
अङ्कादेव फलं बोध्यमिति तन्त्रविदाम्मतम्॥
इत्युक्तत्वात्॥
व्ययाधिकं न कर्त्तव्यं गृहमायाधिकं शुभम्॥”
इति ज्योतिस्तत्त्वम्॥ * ॥

षोड़शप्रकारा रतिबन्धा यथा, रतिमञ्जर्य्याम्। ४०—४१।
“पद्मासनो नागपदो लतावेष्टोऽर्द्धसम्पुटः।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः।
क्षुब्धो वै धेनुकश्चैव समुत्कण्ठस्ततः परः।
सिंहासनो रतिनागो विद्याधरस्तु षोड़श॥”

(एतेषां लक्षणानि तत्रैव। ४२-५७। उक्तानि। यथा,—
“हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढ़ं समाकृष्य बन्धोऽयं पद्मसंज्ञकः॥
पादौ स्कन्धयुगे हस्तौ क्षिपेल्लिङ्गं भगे लघु।
प्ररमेत् कामुको नारीं बन्धो नागपदो मतः॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम्।
लघु लिङ्गं ताड़येद्द योनौ लतावेष्टोऽयमुच्यते॥
स्त्रीपादावन्तरीक्षे तु किञ्चिद्भूमौ च जानुनि।
स्तनयोर्मर्द्दनं पीड़ा बन्धोऽयं मर्द्दसंपुटः॥
स्त्रीपादद्वयमास्फाल्य हठाल्लिङ्गस्य ताड़नम्।
योनिमापीड़येत् कामी बन्धः कुलिशसंज्ञकः॥
नारीपादद्वयं कामी धारयेदूर्द्ध्वदेशतः।
कुचौ धृत्वा पीबेद्वक्त्रं बन्धोऽयं रतिसुन्दरः॥
स्त्रियो जङ्घे समापीड्य दोर्भ्यां गात्रस्य मर्द्दनम्।
पुनः प्रपीड़येद्द योनिं बन्धः केशरसंज्ञकः॥
हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ।
यथेष्टं ताड़येत् योनिं बन्धो हिल्लोलसंज्ञकः॥
पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम्।
हस्तयोर्वेष्टनं गाढ़ं बन्धो नृसिंहसंज्ञकः॥
पादमेकमुरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीञ्च सुरमेत् कामी विपरीतस्तु बन्धकः॥
पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
बाहुभ्यां ताड़येद्गाढ़ं क्षुब्धको बन्ध एव सः॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः।
यल्लिङ्गं चालयेत् योनौ बन्धोऽयं धेनुकः स्मृतः॥
नारीपादौ च हस्तेन धारयेत् गलके पुनः।
स्तनार्पितकरो कामी बन्धश्चोत्कण्ठसंज्ञकः॥
स्वयं जङ्घाद्वयं बाह्वौ कृत्वा योषित्पदद्वयम्॥
स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः॥
पीड़येदुरुयुग्मेन कामुकः कामिनीं यदि।
रतिर्नागः समाख्यातः कामिनीनां मनोहरः॥
नार्य्याश्चोरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मतः॥”
इति॥)

संज्ञाप्रभेदेन अन्योऽपि बन्धोऽस्ति। यथा,—
“कामप्रदो विपरीतो नागरो रतिपाशकः।
केयूरः प्रियतोषश्च ततः समपदस्तथा॥
ततश्चैकपदो ज्ञेयः सम्पुटश्चोर्द्ध्वसम्पुटः।
ततः स्तनभवश्चैव ततो नु रतिसुन्दरः॥
ऊरुपीड़स्मरचक्रौ ततश्चोरुक्रमः स्मृतः।
वेष्टको हंसकीलस्तु ततो लीलासनस्तथा॥
अष्टादशक्रमाद्बन्धाः स्त्रीणां बहुसुखप्रदाः।
पुंसां सुखकराश्चैव कथितास्तु क्रमात्ततः॥”
इति स्मरदीपिका॥ * ॥

अनभिसन्धितकर्म्मकर्त्तुर्बन्धाभावो यथा,—
“पश्वर्णदानैरशुभं नुद्यतेऽनभिसन्धितैः।
फलैस्तथोपभोगैश्च पूर्व्वकर्म्मशुभाशुभैः॥
एवं न बन्धो भवति कुर्व्वतः कारणं विना।
न च बन्धाय तत् कर्म्म भवत्यनभिसन्धितम्॥”
इति मार्कण्डेयपुराणम्॥

(हठयोगप्रदीपोक्ता योगसाधकबन्धा यथा, तत्रैव। ३। ५५—५७।

अथोड्डीयानबन्धः।
“बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः।
उड्डीयानं तदेव स्यात् तत्र बन्धोऽभिधीयते॥
उदरे पश्चिमं तानं नाभेरूर्द्ध्वञ्च कारयेत्।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी॥”

अथ मूलबन्धः। तल्लक्षणादिकमुक्तं तत्रैव ३। ६१—६२।
“पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्।
अपानमूर्द्ध्वमाकृष्य मूलबन्धोऽभिधीयते॥
अधोगतिमपानं वा ऊर्द्ध्वगं कुरुते बलात्।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः॥”

अथ जालन्धरबन्धः। अस्य लक्षणादिकमुक्तं तत्रैव। ३। ७०—७१।
“कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढ़म्।
बन्धो जालन्धराख्योऽयं जरामृत्युविनाशकः॥
बध्नाति हि शिराजालमधोगामि नभोजलम्।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः॥”)

बन्धकं, क्ली, (बध्नातीति। बन्ध+ण्वुल्।) ऋणाय स्थापितं वस्तु। बाँधा इति भाषा। इति आधिशब्दनानार्थे अमरः॥ इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधिः। स च द्विधैव। कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविधः गोप्यो भोग्यश्च। यथाह नारदः।
“अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालापनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति॥”
कृते काले आधानकाल एवास्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयम् उद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः। एवञ्चतुर्विधस्याधेर्विशेषमाह।
“आधिः प्रणश्येत् द्विगुणे धने यदि न मोक्ष्यते।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति॥”
प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन मोक्ष्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः स्वम्भवति। कालकृतः कृतकालः आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्व्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात् प्रागूर्द्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः। काले कालकृतो नश्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः फलभोग्यो न नश्यतीति पारिशेष्यादाधिः प्रणश्येदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्द्दशदिवसप्रतीक्षणं कर्त्तव्यं वृहस्पतिवचनात्।
“हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च।
तदन्तराधनं दत्त्वा ऋणी बन्धमवाप्नुयादिति॥”
किञ्च।
“गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृतादृते॥”
गोप्याधेस्ताम्रकटाहादेरुपभोगेन वृद्धिर्भवति। अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्धः। नष्टो विकृतिं गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्व्ववत्कृत्वा देयः तत्र गोप्याधिर्नष्टश्चेत् पूर्व्ववत् कृत्वा देयः। उपयुक्तोऽपि चेत् वृद्धिरपि हातव्या भोग्याधिर्यदि नष्टस्तदा पूर्व्ववत् कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्वा हातव्या। विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते